॥मूर्खपद्धति॥

बोद्धारो मत्सर ग्रस्ताः प्रभवः स्मय दूषिताः ।

अबोधोपहताः चान्ये जीर्णमंगे सुभाषितम् ॥ 1

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।

ज्ञानलव दुर्विदग्धं ब्रह्मापि तं नरं न रंजयति ॥ 2

प्रसह्य मणिमुद्धरेन्मकर वक्त्र दंष्ट्रांतरात्

समुद्रमपि संतरेत्प्रचलदूर्मि मालाकुलम् ।

भुजंगमपि कोपितं शिरसि पुष्पवद्धारयेत्

न तु प्रतिनिविष्ट मूर्ख जन चित्तमाराधयेत् ॥ 3

लभेत सिकतासु तैलमपि यत्नतः पीडयन्

पिबेच्च मृग तृष्णिकासु सलिलं पिपासार्दितः ।

कदाचिदपि पर्यटन् शश विषाणमासादयेत्

न तु प्रतिनिविष्ट मूर्ख जनचित्तमाराधयेत् ॥4

व्याळं बाल मृणाल तंतुभिरसौ रोद्धुं समुज्जृंभते

भेत्तुं वज्रमणिं शिरीषकुसुम प्रांतेन सन्नह्यति ।

माधुर्यं मधुबिंदुना रचयितुं क्षारांबुधे रीहते

मूर्खान्यः प्रतिनेतु मिच्छति बलात्सूक्तैः सुधा स्यंदिभिः ॥ 5

स्वायत्त मेकांतहितं विधात्रा

विनिर्मितं छादनमज्ञतायाः ।

विशेषतः सर्व विदां समाजे

विभूषणं मौनमपंडितानाम् ॥ 6

यदा किंचिद्ज्ञोऽहं द्विप इव मदांधः समभवं

तदा सर्वज्ञोऽस्मीत्यभव दवलिप्तं मम मनः ।
यदा किंचित्किंचिद्बुधजन सकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥ 7
कृमि कुल चित्तं लाला क्लिन्नं विगंधि जुगुप्सितं
निरुपम रसं प्रीत्या खादन्खरास्थि निरामिषम् ।
सुरपतिमपि श्वा पार्श्वस्थं विलोक्य न शंकते
न हि गणयति क्षुद्रो जंतुः परिग्रह फल्गुताम् ॥ 8
शिरः शार्वं स्वर्गात्पशुपति शिरस्तः क्षितिधरं
महीध्रादुत्तुंगादवनिमवनेश्चापि जलधिम् ।
अधो गंगा सेयं पदमुपगता स्तोकमथवा
विवेक भ्रष्टानां भवति विनिपातः शतमुखः ॥ 9
शक्यो वारयितुं जलेन हुतभुक्छत्रेण सूर्यातपो
नागेंद्रो निशितांकुशेन समदो दंडेन गौर्गर्दभः ।
व्याधिर्भेषज संग्रहैश्च विविधैर्मंत्र प्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्र विहितं मूर्खस्य नास्त्यौषधम् ॥ 10